॥ श्री जिनाय नमः ॥

# ॥ अथ श्री कामकुंभादिकथा संग्रहः ॥

आचार्य महाराजश्री विजयनीतिसूरिजीना शिष्य पन्न्यास दान-
विजयजी गणीजीना सदुपदेशथी.

वडनगर निवासी-शा पुनमचन्द बादरभाइनी विधवा बाइ मणी तरफथी
साधु साध्वीने भेट,

**प्रकाशकः**-मास्तर उमेदचन्द रायचन्द, पांजरापोळ.—अमदावाद,

कोपी ५०० प्रथमावृत्ति- अमूल्य (भेट) सन्ने १९२३

आ पुस्तक जैन एडवोकेट प्रेसमां शा, चीमनलाल गोकलदासे छाप्युं छे, घीकांटावाडी—अमदावाद

Scanned by CamScanner

॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीकामकुंभकथा प्रारभ्यते ॥

पान्तुवः श्री महावीर–स्वामिनो देशनागिरः ॥
भव्यानामान्तरमल–प्रक्षालनजलोपमाः ॥ १ ॥

यः प्राप्य दुष्प्राप्यमिदं नरत्वं । धर्मं न यत्नेन करोति मूढः ।
क्लेशप्रबन्धेन सलब्धमब्धौ । चिंतामणिं पातयति प्रमादात् ॥ २ ॥

धर्मतः सकलमंगलावली । धर्मतः सकलसौख्यसंपदः ॥ धर्मतः स्फुरति निर्मलं यशो । धर्म एव तदहो विधीयतां ॥ १ ॥ धर्मश्चिंतामणिः श्रेष्टो । धर्मः कल्पद्रुमः परः ॥ धर्मः कामदुघा धेनु–र्धर्मः सर्वफलप्रदः ॥ २ ॥ वने रणे शत्रुज-

लाग्निमध्ये । महार्णवे पर्वतमस्तके वा ॥ सुप्तं प्रमत्तं विषमस्थितं वा । रक्षन्ति पुण्यानि पुराकृतानि ॥३॥ व्यसनशत-
गतानां क्लेशरोगातुराणां । मरणभयहतानां दुःखशोकार्दितानां ॥ जगति बहुविधानां व्याकुलानां जनानां । शरणमश-
रणानां नित्यमेको हि धर्मः ॥ ४ ॥ धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्बलं । धर्मेणैव भवंति निर्मलयशोविद्यार्थ-
संपत्तयः ॥ कांताराच्च महाभयाच्च सततं धर्मः परित्रायते । धर्मः सम्यगुपासितो भवति हि स्वर्गापवर्गप्रदः ॥ ५ ॥ ध-
र्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदः । सौभाग्यार्थिषु तत्प्रदः किमपरं पुत्रार्थिनां पुत्रदः ॥ राज्या-
र्थिष्वपि राज्यदः किमथवा नानाविकल्पैर्नृणां । तत्किं यन्न करोति किं च कुरुते स्वर्गापवर्गावपि ॥ ६ ॥ पत्नी प्रेम-
वती सुतः सुविनयो भ्राता गुणालंकृतः । स्निग्धो बंधुजनः सखापि चतुरो नित्यं प्रसन्नः प्रभुः ॥ निर्लोभानुचराः
स्वबंधुसुमनः प्रायोऽत्र भोग्यं धनं । पुण्यानामुदयेन संततमिदं कस्यापि संपद्यते ॥ ७ ॥ तथाहि—

श्रीपुरनगरे जितारिः पृथिवीपतिः, तस्य मतिसागरनामा मंत्री, सोऽतीवमान्यः, राजा वदति राज्यादिकं स-
र्वं पापेन भवति, मंत्र्याह मैवं वद राजन्. पापफलं त्वेवं—कुग्रामवासः कुनरेंद्रसेवा । कुभोजनं क्रोधमुखी च भार्या ॥ -
न्याबहुत्वं च दरिद्रता च । षड् जीवलोके नरका भवन्ति ॥८॥ मंत्री तु धर्मादेव सर्वं भव्यं भवतीति मन्यते.

इति वदतो राज्ञः पापबुद्धिरिति नाम जातं, मंत्रिणस्तु पुण्यबुद्धिरिति, एवं सभांतरे सर्वदा पुण्यपापविषये विवादो
भवति, एकदा राज्ञोक्तं त्वं पुण्यं मन्यसे, तेन तव स्वल्पा लक्ष्मीः. मम च पापादेव राज्यादिसुखं, यदहं युद्धवधादिकं

Scanned by CamScanner

करोमि, तेन मे हयगजांतःपुरभांडागारादिवृद्धिः, तव च पुण्यं कुर्वतोऽपि यत्तव गृहे द्रव्यादि किमप्यस्ति तदपि समस्तं मया समर्पितमेव, न च ते पुण्यफलं. एवं सत्यपि यदि त्वं धर्मं मन्यसे तदा धनं विनैकाकी देशांतरे गत्वा धर्मादेव धनमर्जयित्वागच्छ ? तदाहं ते धर्मफलं वेद्मि. मंत्रिणोक्तमेवमस्तु,

एवमुक्त्वा मंत्री देशांतरे गतः, एकदा रात्रावटव्यां गच्छतस्तस्य कोऽपि राक्षसो मिलितः, मंत्रिणा तस्मिन् दृष्टमात्रे फूत्कारः कृतः, मा मा इत्युक्ते राक्षसेनोक्तं मा मेति मा वद ? अथाहं सप्तदिनबुभुक्षितस्त्वां भक्षयिष्यामि, मंत्रिणोक्तमधुना तावन्ममोपरि त्वं प्रसादं कुरु ? यत्संप्रति मम कार्यमस्ति; अहं कार्यार्थ्यग्रे गच्छन्नस्मि. तत्कृत्वा पश्चाद्वलमानस्तव क्षुधोपशमं करिष्यामि, इत्युक्ते पुण्यप्रभावाद्राक्षसेन स मंत्री मुक्तः, अथाग्रे गच्छता तेन कस्यचिन्नगरस्यासन्ने वाटिकायां श्रीऋषभदेवप्रासादो दृष्टः, तत्र गत्वाऽतिहृष्टः सन् स स्वहृदयोद्भूतभावेन वीतरागस्तुतिं पठति, यथा–अमोघावासरे विद्यु–दमोघं निशि गर्जितं ॥ अमोघं साधुवचन–ममोघं देवदर्शनं ॥९॥ न यांति दास्यं न दरिद्रभावं । न प्रेष्यतां नैव च हीनयोनिं॥न चापि वैकल्यमथेन्द्रियाणां । ये कारयंत्यत्र जिनेंद्रपूजां॥२॥धन्यानां ते नरा धन्या । ये जिनेंद्रमुखांबुजं ॥ निर्विकारि मनोहारि । पश्यंति दिवसोदये ॥१०॥

इत्यादि तत्स्तुत्या मुदितः प्रतिमाऽऽरक्षककपर्द्दीयक्षः प्रत्यक्षो जातः, इति श्रीजिनभक्तिसंतुष्टेन तेन कपर्द्दियक्षेण बहिर्गत्वा तस्य कामघटः समर्पितः, मंत्रिणोक्तं भो यक्ष अहमेनं घटं कथं गृह्णामि ? कथं वा स्थापयामि ? अनेन समी-

पश्येन च पुरुषस्य लज्जा स्यात्. ततो देवेनोक्तमनुत्पादित एवायं घटोऽदृष्टः सन् तव पृष्ठावागमिष्यति. ततो मंत्रिणा मानितं, ततः स मंत्री कृतकृत्यः सन् तं कामकुंभं लात्वा स्वगृहं प्रति चलितः.

अथ पश्चाद्वलमानः स तस्यामेवाटव्यां समागतः, तदा राक्षसोऽपि समायातः, तेन राक्षसेनोक्तमथ त्वं स्वं वचः पालय. मंत्रिणोक्तं पालयिष्यामि, परं किमनेन मेऽशुचिना शरीरेण भक्षितेन? यतः—रसासृग्मांसमेदास्थि-मज्जाशुक्राणि धातवः॥सप्तैव दश वैकेषां । रोमत्वक्स्नायुभिः सह॥११॥अमेध्यपूर्णे कृमिजालसंकुले स्वभावदुर्गंध अशौचनिन्हवे ॥ कलेवरे मूत्रपुरीषभोजने । लषंति मूढा विरमंति पंडिताः॥१२॥पुनर्मंत्रिणोक्तं हे राक्षस मम शरीरेण तव कार्यं? वा सरसरसवत्या तव कार्यं ? तेनोक्तं तर्हि सरसां रसवतीं देहि ? तदा तेन मंत्रिणा कामघटप्रभावेण यथेष्टां रसवतीं तस्मै दत्वा तस्य दिव्याहारो भोजितः, ततः संतुष्टेनराक्षसेनोक्तमेवंविधा रसवती त्वया कथं दत्ता ? सधर्मेणाऽसत्यपापभीरुणा च तेन मंत्रिणा सत्यमेवोक्तं यत्कामघटप्रभावेण, ततो राक्षसेन स कामघटो याचितः, तदा मंत्रिणोक्तमेवंविधं कामघटमहं कथं तवाऽर्पयामि ? राक्षसेनोक्तं यदि त्वमर्पयिष्यसि तदाऽहमतः परं हिंसां न करिष्यामि, तव च ततः पुण्यं भविष्यति; अहमपि च तव सकलकार्यकरं रिपुशस्त्रनिवारकं कथितकार्यकारकं देवताधिष्ठितं च दंडमर्पयिष्यामि, अतस्त्वं मे कामघटं समर्पय ? मंत्रिणोक्तमहं समर्पयामि, तथापि तवाऽधर्मेण स न स्थास्यति सर्वथा, राक्षसेनोक्तमहं सर्वं प्रयत्नेन स्थापयिष्यामि इत्युक्ते मंत्री दंडप्रभावं ज्ञात्वा, घटं च तस्मै अर्पयित्वा दंडं च गृहीत्वाऽग्रतश्चचाल. तस्य मंत्रिणो गच्छतो



Scanned by CamScanner

द्वितीयदिने बुभुक्षा लग्ना, तदा तेन दंडश्चालापितो, यत्त्वं भोजनं दास्यसि ? तेनोक्तं न हि भोजनदाने मम सामर्थ्यं,

" आदौ रूपविनाशिनी कृशकरी कामस्य विध्वंसिनी । ज्ञानं मंदकरी तपः क्षयकरी धर्मस्य निर्मूलनी ॥

पुत्रभ्रातृकलत्रभेदनकरी लज्जाकुलच्छेदिनी । सा मां पीडति सर्वदोषजननी प्राणापहारी क्षुधा ॥ १३ ॥

दंडेनोक्तम अन्यत्किमपि कार्यं मम कथय, तत्करिष्यामि. तेनोक्तं तर्हि कामघटमानय. तदा स आनयिष्यामीत्युक्त्वाऽऽकाशमार्गेण चचाल. गतश्च स तत्र यत्र स राक्षस आसीत्, ततस्तं कुट्टयित्वा द्वारं भङ्क्त्वा कामघटं च गृहीत्वा स मन्त्रिसमीपे समागतः. मन्त्रिणाथ स कामघट आलापितो यत्त्वं तत्र किं समाधिना स्थितः ? घटेनोक्तं क्व मे समाधिः ? यतस्त्वं मां यस्य कस्याऽप्यधर्मिणेऽर्पयसि. मम तु धर्मवतामेव समीपे समाधिर्नान्यत्र. ततस्तेन मन्त्रिणे भोजनं दत्तं, गतश्च तद्द्वयं ज्ञात्वा स मन्त्र्यग्रतश्चचाल. क्रमेण स कस्यापि ग्रामस्य समीपे समागतः, तत्र तेन रैवताचलशत्रुंजयाख्यतीर्थद्वययात्रां कृत्वा पश्चाद्वलमानः कश्चित्संघः समागतो दृष्टः, संघं दृष्ट्वा मन्त्री त्वतीव हृष्टः, यतः–यात्रार्थं भोजनं येषां दानार्थं च धनार्जनम् ॥ धर्मार्थं जीवितं येषां ते नराः स्वर्गगामिनः ॥ १४ ॥ विवेकः सह संपत्त्या । विनयो विद्यया सह ॥ प्रभुत्वं च श्रियोपेतं । चिन्हमेतन्महात्मनाम् ॥ १५ ॥ स्पृष्ट्वा शत्रुंजयं तीर्थं नत्वा रैवतकाचलम् ॥ स्नात्वा गजपदे कुंडे पुनर्जन्म न विद्यते ॥ १६ ॥ इति विचार्य मन्त्रिणा संघो भोजनाय निमन्त्रितः, तदा संघेन तमेकाकिनं दुःखितं च दृष्ट्वा रंधनाय प्रारब्धं, ततो मन्त्रिणा जलघटं गृहीत्वा संघमध्यस्थचूल्हकेषु वारि क्षिप्तं, कथितं

चात्र केनापि न रंधनीयं तथाविधं तमसदृशं दृष्ट्वा व्याकुलीभूतः संघपतिश्चिंतयति, यदद्याऽस्य भोजनं तु दूरेऽस्तु, परमात्मीयमपि भोक्तुं न शक्यते. तदा सर्वेऽपि संघपतयः संभूय विचारयन्ति. यदद्य किं करिष्यति संघः ? अयं तु स्वोदरपूरणेऽपि न समर्थः, तथैवास्माकमात्मनीनमपि रंधनाय न ददाति.

ततो वृद्धैरुक्तम्, अथ भोजनवेला जाता, मन्त्रिणागत्य संघ आकारितः, संघोऽपि संदेहदोलारूढः शून्याटव्यां तदुक्तस्थानं प्रति चचाल. अग्रतो गच्छन् संघो दुकूलमयं रमणीयं मंडपं दृष्ट्वा हृष्टो विस्मितश्च. परस्परं पृच्छन्ति जनाः, किमिदं सत्यमसत्यं वा ? दृष्टिभ्रमो वा ? अथ तत्र गमनानन्तरं हस्तेन स्पृष्ट्वा ते मंडपं विलोकयन्ति. ततस्तेन मंत्रिणा घटप्रभावेण तत्र सुवर्णस्थालानि मंडितानि. अष्टोत्तरशतसंख्यामिता स्त्रीभिर्दिव्या रसवती परिवेषिता. ततस्ते परस्परं कथयन्ति यदिदृशानि फलानि, इदृशानि पक्कान्नानि, इदृशा च रसवती न क्वापि कदाचिदपि दृष्टा वाऽस्वादिता. अथ भोजनानन्तरं तेन सकलसंघः परिधापितः, चमत्कारपूरितैः संघपतिभिः पृष्टं, त्वयैतावत्कस्य बलेन कृतं ? तेनोक्तं कामकुंभबलेन, लोभाभिभूतैः संघपतिभिरुक्तं, यदि त्वमस्माकं कामघटमर्पयिष्यसि, तदा तव सर्वदा साधर्मिकवात्सल्यस्य पुण्यं भविष्यति, त्वं तु धर्मार्थी दृश्यसे अपरं चास्माकं चामरयुगलं, राजप्रदं छत्रं च सर्वरोगविषशस्त्रघाताद्युपद्रवनिवारकं त्वं गृहाण, कामघटं चास्माकं समर्पय. मंत्रिणोक्तं देवेन तुष्टेन यद्यस्यार्पितं भवति तत्तत्रैव तिष्ठति, नान्यत्र अर्थिनः संघपतयः कथयन्ति, त्वं तदर्पय तिष्ठतु वा मा तिष्ठतु.

ततो मन्त्रिणा तच्चामरयुगलं राज्यप्रदं छत्रं च गृहीत्वा कामघटः संघपतिभ्यः समर्पितः, तदनु हृष्टः सन् श्रीसंघो मन्त्री च चलितौ स्वस्वस्थानंप्रति. द्वितीयदिने बुभुक्षितो मन्त्री लकुटंप्रति वक्ति, कामघटमानय. तेनोक्तमानयिष्यामी-ति कथयित्वा स संघमध्ये गतः, पार्श्वस्थान् सुभटानाहत्य, तेषां च खड्गखेटकानि भंक्त्वा, मञ्जूषां च भंक्त्वा, सुरक्षितं कामघटं गृहीत्वा स पश्चादागतः, वस्तुत्रयं लात्वा मन्त्रि स्वगृहे प्राप्तः. यतः—जैनो धर्मः प्रकटविभवः संगतिः साधुलोके, विद्वद्गोष्ठी वचनपटुता कौशलं सर्वशास्त्रे ॥ साध्वी लक्ष्मीश्चरणकमले वासनासद्गुरूणां । शुद्धं शीलं मतिरमलिना प्राप्यते भाग्यवद्भिः ॥ १७ ॥ अथ तस्मिन्नेव दिने राज्ञा धर्मपरीक्षार्थं बीजपूरकद्वयमानाय्यैकस्य बीजपूरकस्य मध्ये सपादलक्षमूल्यं रत्नं क्षिप्त्वा जनस्य हस्ते विक्रयार्थमर्पितं, तस्योक्तं च, शाकचतुष्पथे शाकविक्रयकारिणे त्वयैतत्समर्पणीयं, यावता तं कोऽपि न गृह्णाति तावत्त्वया प्रच्छन्नवृत्त्या तत्रैव स्थेयम्, यदा यः कोऽपि गृह्णाति, तदा तस्याभिधानं ममाग्रे वाच्यं, तेन जनेनापि तथैव कृतं, अथ मन्त्रिणो गृहागमनानन्तरं तस्य जायया मन्त्रिणस्तापोपशांत्यर्थं तत्रागत्य तदेव बीजपूरकं रत्नगर्भितं गृहीत्वा मन्त्रिणे समर्पितं, मन्त्रिणापि तद्भक्षितं तन्मध्याच्च रत्नं गृहीतं. अथ तेन जनेन राज्ञोऽग्रे प्रोक्तं यन्मन्त्रिजायया तद्बीजपूरकं गृहीतं, ततो राज्ञा चिन्तितमेतदपि नूनं धर्ममाहात्म्यमेव. अथ रात्रौ मन्त्रिणा सप्तभूमिकः स्वर्णमयावासः कृतः, तत्र रक्तरत्नखचितानि स्वर्णकपिशीर्षकाणि भांतिस्म, द्वात्रिंशद्वाजिन्त्रोपेतं दिव्यगीतनाट्यान्वितं च नाटकं बभूव. तद् दृष्ट्वा श्रुत्वा च राजा मनसि चमत्कृतः सन् चिंतयति, किमेषः स्वर्गः ? किमिंद्रजालं

Scanned by CamScanner

वा स्वप्नं पश्यामि? इति चिन्तयन् स निशायां सुष्वाप. प्रातर्मंत्री दिव्यवस्त्राणि परिधाय सुवर्णस्थालं च रत्नैर्भृत्वा राज्ञे मिलितः, राज्ञा पृष्टमेतावन्ति रत्नानि त्वया कुतः प्राप्तानि ? मन्त्रिणोक्तं धर्मप्रभावात्, पुना राज्ञोक्तं रात्रौ स्वर्णमयावासो दिव्यनाटकं च किं तवैवासीत् ? तेनोक्तमेवमेव. अथ तदावासं द्रष्टुकामेन राज्ञा मन्त्रिणे प्रोक्तमहं स्वल्पपरिवारयुतस्तव गृहे भोजनं कर्त्तुमिच्छामि, ततो मासप्रांते मां तव गृहे भोजय ? मन्त्रिणोक्तं स्वामिन्नद्यैवाहं युष्मान् भोजयिष्यामि. अतस्तव देशमध्ये यावान्मेलापकः समस्ति, तावन्तं मेलापकं गृहीत्वा मम गृहे भोजनार्थमागन्तव्यं, यथाहं तान् सर्वानपि भोजयिष्यामि राजा चिन्तयति, अहोऽस्य वणिग्मात्रस्यापि मन्त्रिणः कियत्साहसं वर्त्तते! नूनं तेन मम मेलापकस्य पानीयमपि पातुं न शक्यते, तर्हि किं पुनर्भोजनं ? रुष्टेन राज्ञा तस्मिन्नेव दिने निजदेशसर्वमेलापको मेलितः ।

अथ राज्ञा मन्त्रिणो गृहे तत्स्वरूपविलोकनार्थं प्रच्छन्नं निजपुरुषः प्रेषितः, तेनापि तत्रागत्य यदा मन्त्रिगृहस्वरूपं विलोकितं, तदा कापि भोजनसामग्री न दृष्टा, परं सप्तमभूमौ मन्त्री सामायिकं गृहीत्वा नमस्कारान् जपंस्तेन दृष्टः, ततस्तेन जनेन पश्चादागत्य तत्सर्वं स्वरूपं राज्ञे निवेदितं. तदा राजा चिन्तयति नूनमेष मन्त्री ग्रथिलीभूय छुटिष्यति, पश्चान्मया त्वेतेभ्यः सर्वेभ्यो भोजनं देयं भविष्यति. एवं स किंकर्त्तव्यतामूढो जातः, एतावता मन्त्री राज्ञः समीपं समागत्य विज्ञपयामास, हे स्वामिन् समागम्यतां, रसवती शीतला जायमानास्ति. तत् श्रुत्वा राज्ञोक्तं भो मन्त्रिन् त्वया मयापि सार्द्धं किं हास्यं प्रारब्धमस्ति ? यतस्तव गृ; तु साम्प्रतं स्वल्पापि भोजनसामग्री नास्ति. तदा सचिवेनोक्तं हे स्वामिन् एकशस्तत्र



Scanned by CamScanner

पादाववधार्य विलोक्यतां ? राजा सविस्तृतपरिकरस्तत्रागतः, कामपि सामग्रीमनालोक्य च रोषारुणो जातः सन् चिंतयति. यतः—

कोह पइट्ठिओ देहधरिं । तिन्नि विकार करेइ ॥ आप तपावें परतपें । पर तइ हांणि करेइ ॥ १८ ॥ लागो कोह-दवानलो । डज्झइ गुणरयणाइं ॥ उवसमजलें जो ओलवें । न सहे दुक्खसयाइं ॥ १९ ॥ अपूर्वः कोऽपि कोपाग्निः । सज्जनस्य खलस्य च॥ एकस्य शाम्यति स्नेहात् । वर्द्धतेऽन्यस्य वारितः ॥२० एष यदि भोजनं न दास्यति. तदा विविधकदर्थनयाहं तं विगोपयिष्यामीति चिंतयन्मनुष्यलक्षैः परिवृतो राजा तत्र गतः, तदा तद्गृहाडम्बरं दृष्ट्वा चिन्तयति, किमेषः स्वर्गः ? किंवा स्वर्गविमानं ? किमिदं सत्यमसत्यं वा ? इति विस्मितः सन् सपरिवारः स एवंविधां दिव्यपक्वान्नादिमयां रसवतीं भक्षयामास. भुंजन् सन् स राजा पार्श्वस्थान् पुरुषान् पृच्छति, भो जना एवंविधानि पक्वान्नानि युष्माभिः क्वापि दृष्टानि श्रुतानि वा ? तदा सर्वैरपि नेत्युक्तम्—

एवमतीवभक्त्या भोजितास्ते राजादयस्तेन सर्वेऽपि दिव्यवस्त्रैः परिधापिताः, तदनु विस्मितेन राज्ञा मन्त्री पृष्टः, भो मंत्रिनेतावंतो जनास्त्वया कस्य प्रसादेन भोजिताः ? मन्त्रिणोक्तम्, देवताधिष्ठितमहाप्रभाविककामघटप्रसादेन तत् श्रुत्वा राज्ञोक्तं—तं कामघटं ममार्पय ? यतः शत्रुसैन्यादिकृतपराभवावसरे स मम महोपयोगी भविष्यति, तदा मंत्रिणोक्तमधर्मवतस्तव गृहे स सर्वथा न स्थास्यति. राज्ञोक्तमेकवारस्त्वमेनं ममार्पय ? अहमुपायेन तं स्थापयिष्यामि. येन

दास्यसि तर्हि प्रत्युताहं तवाऽनर्थाय भविष्यामि. तदा मंत्रिणा स कामघटस्तस्मै समर्पितः, राज्ञाप्यतियत्नेन स्वगृहमध्ये स भांडागारे स्थापितः, परितश्च खड्गखेटककरा निजसहस्रसुभटाः स्थापिताः, उक्तं च तेभ्यस्तेन दिनत्रयं यावद्भवद्भिः सावधानतयाऽस्य घटस्य रक्षा विधेया, युष्माभिर्मे बांधवरूपैः सेवकैरिदं कार्यं सावधानतया विधेयम् यतः—

आतुरे व्यसने प्राप्ते । दुर्भिक्षे शत्रुनिग्रहे ॥ राजद्वारे स्मशाने च । यस्तिष्ठति स बांधवः ॥ २१ ॥ जानीयात्प्रेषणे भृत्यान् । बांधवान् व्यसनागमे ॥ मित्रमापदि काले च । भार्यां च विभवक्षये ॥ २२ ॥ अथ द्वितीयदिने तस्मिन्पुरेऽपि धर्ममाहात्म्यदर्शनाय मंत्रिणा लकुटं प्रति प्रोक्तं कामघटं मे समानय ? एवं मंत्रिप्रहितो लकुटो राज्ञो गृहे गत्वा सर्वान् सुभटान् कुट्टयित्वा, रुधिरं वमतश्च विधाय, मूर्छाभिभूतान् कृत्वा कामघटं गृहीत्वा मंत्रिगृहे समागतः. राजा कामघटं गतं दृष्ट्वा विषण्णचेता मंत्रिगृहे गत्वोवाच, भो मंत्रिन् तवोक्तं सर्वं सत्यं जातं, सांप्रतमयमनर्थः समुत्पन्नः, अतः प्रसादं कृत्वा ममैतत्सैन्यं सज्जीकुरु ? एवं राज्ञो बह्वाग्रहेण मंत्री तत्र गत्वा तेषां सुभटानामुपरि प्रभावान्वितं चामरं ढालयित्वा सर्वानपि सुभटान् सज्जीकृतवान्. ततो मंत्रिणोक्तं किं दृष्टोऽयं युष्माभिर्मम धर्मप्रभावः ? राज्ञोक्तं दृष्टः, ततो राज्ञापि धर्मोऽङ्गीकृतः, प्रोक्तं च सर्वमपि शुभं धर्मादेव भवति, अतोऽहो धर्मप्रभावो जयति, सर्वनगरलोकैरपि धर्मस्य प्रभाव एव मनसि कृतः. चिंतितं च तैः—कीटिकासंचितं धान्यं । मक्षिकासंचितं मधु ॥ कृपणेन संचिता लक्ष्मी–रपरैः परिभुज्यते ॥ २३ ॥



Scanned by CamScanner

अथैवं कियद्दिनानि यावद्राज्ञा धर्मप्रभावो मानितः, पुनरपि चलचित्तेन राज्ञैकदा मंत्रिणे प्रोक्तं, भो मंत्रिन् घुणाक्षरन्यायेनैकशस्तव भाग्यं फलितं, परं नायं धर्मप्रभावः, इदं सर्वमपि पापफलमेव, अतस्त्वं द्वितीयवारं पुनरपि मम पुण्यफलं दर्शय ? कामघटं चामरयुगलं लकुटं चात्र मुक्त्वा सभार्योऽपि देशांतरे गत्वा धनमर्जयित्वा पुनरपि यदि त्वमत्रागमिष्यसि, तदाहं तव धर्मप्रभावं मानयिष्यामि, नान्यथा, ततः परोपकारतत्परेण मंत्रिणा तदपि मानितं.––

तदनु मंत्री राज्ञे निजगृहं संभाल्य सभार्योऽपि देशांतरं गच्छन् कियद्दिवसैः समुद्रतटे गंभीररं नगपुरं प्राप्तः, नगरासन्नवाटिकायां च देवकुले देवनत्यर्थं श्रीवीतरागप्रासादे प्राप्तः. तदवसरे तत्रस्थजनमुखात्तेन श्रुतं यत्सागरदत्तनामा व्यवहारी पूरितयानपात्रो द्वीपान्तरं प्रति गच्छन् लोकेभ्यो दानं ददाति तत् श्रुत्वा स मंत्र्यपि निजभार्यां तत्रैव मुक्त्वा दानग्रहणार्थी समुद्रतटे समागतः, तत्र तेन दानार्थिजनानां बहुसमुदायो मिलितो दृष्टः, यतः–यस्यास्ति वित्तं स नरः कुलीनः, स पंडितः स श्रुतवान् गुणज्ञः ।। स एव वक्ता स च दर्शनीयः सर्वे गुणाः कांचनमाश्रयंते ॥ २४ ॥

इतो मंत्रिणा सर्वलोकेभ्यो द्रव्यदानानंतरं वाहने चटितः सागरदत्तव्यवहारी दृष्टः, तेन सोऽपि दानार्थं जलमध्ये कियद्भूमिं लंघयित्वा तस्य वाहने चटित्वा श्रेष्ठिनः पार्श्वे दानं याचितवान् व्यवहारिणापि तस्मै दानं दत्तं एवं दानं गृहीत्वा मंत्री यावत्पश्चादागंतुमिच्छति, तावत्सुवायुना पूरितं प्रवहणं समुद्रमध्ये दूरं गतं. तेन स पश्चात्तटे समागंतुं न समर्थो

Scanned by CamScanner

बभूव प्रवहणमध्ये एव च स्थितः, अथ सागरदत्तेन व्यवहारिणा मिथःकथाप्रसंगेन स मंत्री सकलकलाकलापकुशलो ज्ञातः ततस्तेन व्यवहारिणा मंत्रिणे पृष्टं त्वं लेखलिखनादिकं किमपि वेत्सि ? तेनोक्तं वेद्मि यतः—बावत्तरिकलाकुसला । पंडियपुरिसा अपंडिया चेव ॥ सव्वकलाणं पवरां । जे धम्मकलां न जाणंति ॥ २५ ॥ तदा व्यवहारिणोक्तं तर्हि त्वं मम व्यापारसंबंधिलेखादिकार्यं कुरु ? तेनापि तदंगीकृतं, ततो व्यवहारिणापि स लेखादिकार्ये स्थापितः, एवं स तत्र सुखेन कालं गमयति.

अथ मंत्रिणा देवकुले मुक्ता तस्य भार्या विनयसुंदरी स्वपतिवार्त्तामलभमाना कुंभकारगृहे स्थिता, कुंभकारेणापि तस्याः पुण्यशीलमाहात्म्येन सा निजसुतापदे स्थापिता. यतः—लज्जा दया दमो धैर्यं । पुरुषालापवर्जनं ॥ एकाकित्वपरित्यागो । नारीणां शीलरक्षणं ॥ २६ ॥ अथ सा सती तत्रस्था स्वोचितानेवंविधान्नियमान् जग्राह, यथा भर्तुर्मिलनावधि भूमौ शयनीयं. स्नानं न कार्यं, रक्तवस्त्राणि त्याज्यानि, पुष्पांगरागविलेपनं त्याज्यं, नाऽस्वाद्यं तांबूलं, लवंगैलाचीजातिफलानां नियमः. शरीरमलोऽपि विभूषार्थं नापनेयः, सर्वशाकानां नियमः, दधिदुग्धपक्वान्नगुडखंडशर्करापायसप्रभृतिसर्वसरसमाहारं न भोक्ष्ये. नीरस एवाहारो मया ग्राह्यः सदैकभक्तमेव कार्यं, महत्कार्यं विना गृहाद्बहिर्न निर्गंतव्य, गवाक्षेषु न स्थातव्यं, लोकानां विवाहाद्यपि न वीक्षणीयं, सखीभिरपि सह नर्मालापपुरुषस्त्रीशृंगारहास्यविलासनेपथ्यादिका विकथा न कार्या, वैराग्यकथैव पठनीया गुणनीया च. कर्मकरादिभिः सहाप्यालापसंलापादि न कार्यं,

तर्हि अन्यपुरुषैः सह तु दूरे एव, चित्रस्था अपि पुरुषा नालोकनीया इति, अथ स मंत्री तेन व्यवहारिणा सह सुखेन रत्नद्वीपं गतः, तत्र सुरपुरं नाम नगरं. शक्रपुरंदराभिधश्च राजा. अथ तेन व्यवहारिणा प्रवहणात्सर्वक्रयाणकान्युत्तार्य वखारेषु क्षिप्तानि तेषां क्रयविक्रयादिसर्वव्यवसायस्तेन मंत्रिणे समर्पितः, तेन स मंत्रि तत्र सर्वव्यवसायं करोति, सागरदत्त व्यवहारी तु नगरांतः स्थितगणिकायामासक्तो जातः, यतः—यौवनं धनसंपत्तिः । प्रभुत्वमविवेकिता ॥ एकैकमप्यनर्थाय । किं पुनस्तच्चतुष्टयम् ॥ २७ ॥ अथ स श्रेष्ठी तु तया वेश्यया सह विषयसुखं भुनक्ति, एकदा तया वेश्यया चिंतितं, यदस्य श्रेष्ठिनो यो धर्मबुद्धिनामा व्यापाराधिकारी वर्त्तते. स यदि केनचिदप्युपायेनास्माकं गृहे समागच्छेत्तदा नो बहुद्रव्यलाभो भवेत्, यतः स एव सर्वद्रव्याधिकार्यस्ति. एवं विचार्येत्थं सज्जितषोडशश्रृंगारा कपटनाटकैकपटुः सा गणिका मंत्रिणः क्षोभनार्थं समागता. तत्रागत्य तया विविधहावभावादिविलासचेष्टितैर्मंत्रिणः क्षोभनार्थं बहव उपायाः कृताः, परं स्वदारसंतोषव्रतधारिणो मन्त्रिणो हृदये तया मनागपि रागभावो नोत्पादितः—संसारे हयविहिणा । महिलारूवेण मंडियं पासं ॥ बज्झंति जत्थ मुग्धा । जाणमाणावि बज्झंति ॥ २८ ॥ तस्माद्धर्मार्थिभिस्त्याज्यं । परदारोपसेवनं ॥ नयंति परदारास्तु । नरकानेकविंशति ॥ २९ ॥ भक्कणे देवदव्वस्स । परत्थीगमणेण य ॥ सत्तमं नरयं यांति । सत्तवारा उ गोयमा ॥ ३० ॥

एवं मंत्रिणं स्वहावभावविलासादिभिरप्यक्षुब्धं विज्ञाय निस्फलीभूतनिजमनोरथा सा वेश्या पश्चान्निजगृहे समागता.

एवं परिवर्जितकुसंगस्य तस्य मंत्रिणस्तस्मिन् सकलेऽपि नगरे प्रसिद्धिर्जाता, यतः—सीलं उत्तमवित्तं । सीलं जीवाण मंगलं परमं ॥ सीलं दुहग्गहरं । सीलं सुक्खाण कुलभवणं ॥ ३१ ॥ वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणात् । मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरंगायते ॥ व्यालो माल्यगणायते विषरसः पीयूषवर्षायते । यस्यांगेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ ३२ ॥ एकदा राज्ञा तन्नगरे तटाकं खानयितुं प्रारब्धं, ततः कियद्दिवसैर्लिखितताम्रपत्राणि निःसृतानि. जनैश्च राज्ञे समर्पितानि, राज्ञा च तत्र लिखितलेखपरिवाचनाय तानि पंडितेभ्यः समर्पितानि; किंतु तत्र लिप्यंतरसद्भावात्कोऽपि तानि वाचयितुं न शक्नोति. तदा कौतुकप्रियेण राज्ञा पटहो वादितो. यथा यः कोऽप्यमून्यक्षराणि वाचयिष्यति तस्य राजा स्वीयकन्यामर्द्धं राज्यं च दास्यति, इति वाद्यमानः पटहः क्रमेण मंत्रिगृहसमीपे समागतः. तदा मंत्रिणा स पटहः स्पृष्टः, ततो मंत्रिणा नृपसभायां गत्वा तानि ताम्रपत्राणि वाचितानि, यथा यत्रैतानि पत्राणि निःसृतानि, ततःपूर्वदिशि दशहस्तानि गत्वा कटिप्रमाणं भूमौ खनिते सति तत्रैका महती शिला समेष्यति. तस्या अधश्च दशलक्षाः सुवर्णानां संति, तत् श्रुत्वा सर्वेषां चमत्कारोऽभूत्, कौतुकालोकनोत्कंठितमानसेन राज्ञोक्तं तर्हि संप्रत्येव तत्र गत्वा विलोक्यते. ततः सर्वजनपरिवृतो राजा तत्र गतः. ताम्रपत्रोक्तविधिश्च तेन कृतः, दशलक्षाः सुवर्णानां निःसृताः, सर्वेषां च महान् हर्षो जातः, राज्ञापि मंत्रिणः प्रशंसा कृता, यदहो कीदृशं ज्ञानस्य माहात्म्यमस्तीति, यतः——



Scanned by CamScanner

विद्वत्त्वं च नृपत्वं च । नैव तुल्यं कदाचन ॥ स्वदेशे पूज्यते राजा । विद्वान् सर्वत्र पूज्यते ॥ ३३ ॥ रूपयौवनसंपन्ना । विशालकुलसंभवाः ॥ विद्याहीना न शोभंते । निर्गंधा इव किंशुकाः ॥ ३४ ॥ वरं दरिद्रोऽपि विचक्षणो नरो । नैवार्थयुक्तोऽपि सुशास्त्रवर्जितः ॥ विचक्षणः कार्पटिकोऽपि शोभते । न चापि मूर्खः कनकैरलङ्कृतः ॥ ३५ ॥ विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं । विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः॥विद्या बंधुजनो विदेशगमने विद्या परं दैवतं । विद्या राजसु पूजिता न हि धनं विद्याविहीनः पशुः ॥ ३६ ॥ सुलभानि हि शास्त्राणि । गुरूपदेशस्तु दुर्लभः ॥ शिरो वहति पुष्पाणि । गंधं जानाति नासिका ॥ ३७ ॥ यस्य नास्ति स्वयं प्रज्ञा ॥ शास्त्रं तस्य करोति किम् । लोचनाभ्यां विहीनस्य । दर्पणः किं करिष्यति ॥ ३७ ॥ पंडितेषु गुणाः सर्वे । मूर्खे दोषास्तु केवलाः ॥ तस्मान्मूर्खसहस्रेषु । प्राज्ञ एको न लभ्यते ॥ ३८ ॥ अकुलीनो नृपीभूतो । मूर्खपुत्रश्च पंडितः ॥ अधनेन धनं प्राप्तं । तृणवन्मन्यते जगत् ॥ ३९ ॥

अथ राज्ञा तस्मै मंत्रिणे सौभाग्यसुन्दर्यभिधाना स्वकन्या निजं चार्द्धं राज्यं दत्तं. तथैवानेकगजहयरत्नमणिमाणिक्यस्वर्णादिभृतानि द्वात्रिंशत्प्रवहणान्यप्यर्पितानि, एवंविधां तस्यर्द्धिं दृष्ट्वा सागरदत्तव्यवहारी हृदि प्रज्ज्वलितुं लग्नः. अथ स सागरदत्तो निजशेषक्रयाणकानि विक्रीय तत्रस्थैर्नानाविधैरपरैः क्रयाणकैः प्रवहणमापूर्य पश्चान्मनसीर्ष्यया ज्वलमानः स्वदेशीयत्वाज्जनेन मन्त्रिणमाकारयामास. तदा मन्त्रिणापि निजश्वसुरराज्ञे प्रोक्तं यदहं यास्यामि स्वदेशे, तदा रा-

Scanned by CamScanner

प्राप्यवर्द्धराज्यमूल्यप्रमाणानि स्वर्णमाणिक्यादिरत्नानि भृत्वाऽष्टौ प्रवहणानि तस्य समर्पितानि. समुद्रतटं यावच्च राजा तं प्रेषयितुं समायातः, ततस्तौ मन्त्रिव्यवहारिणौ समुद्रमध्ये चलितौ. अथ स सागरदत्तव्यवहारी मन्त्रिणो रत्नभृतानि प्रवहणानि रूपवतीं च पत्नीं दृष्ट्वा लोभदशां प्राप्तः सन् चिंतयति—कोहो पीइं पणासेइ । माणो विणयनासणो ॥ माया मित्ति पणासेइ । लोहो सव्वविणासणो ॥ ३९ ॥

अथ कपटेनैनं चेन्मारयामि तदैतत्सर्वमपि मे स्वाधीनं भवेत्- इति विचार्य तेन मन्त्रिणा सहाऽधिका प्रीतिर्मंडिता. ददाति प्रतिगृह्णाति । गुह्यमाख्याति पृच्छति ॥ भुंक्ते भोजयते चैवं । षड्विधं प्रीतिलक्षणम् ॥ ४० ॥ अथैकदा सागरदत्तेन मन्त्रिणं प्रति प्रोक्तं पृथक्पृथक्प्रवहणस्थयोरावयोः का प्रीतिः? अतस्त्वं मम प्रवहणे समागच्छ ! ततः सरलस्वभावो मन्त्री तस्य यानपात्रे गतः, सागरदत्तेनोक्तं यद्यावां वाहनप्रांते समुपविश्योल्ललज्जलधिकल्लोललीलां पश्यावस्तदा वरं मन्त्रिणापि तदंगीकृतं. यथावसरं प्राप्य लोभाभिभूतेन तेन सागरदत्तेन मन्त्री समुद्रान्तः पातितः, मन्त्रिणा तु पततैव नमस्कारस्मरणानुभावेन फलकं लब्धं. ततोऽनन्तरं सर्वाण्यपि प्रवहणानि त्वरितो गतानि. अथ स दुष्टो सागरदत्तः कूटशोकं विधाय विलपंत्या राजपुत्र्याः पार्श्वे समागत्य मायया विलपन् सन्नुवाच. हे भद्रे यदि त्वं मदुक्तं करिष्यसि तदाहं त्वां मम सर्वकुटुंबस्वामिनीं करिष्यामि. तस्यैवंविधवचनतस्तया चतुरया ज्ञातं नूनमनेनैव दुरात्मना लोभाभिभूततया मम स्वामी समुद्रमध्ये पातितोऽस्ति. यतः—दिवा पश्यति नो घूकः । काको नक्तं न पश्यति ॥ अपूर्वः कोऽपि

कामांधो । दिवानक्तं न पश्यति ॥ ४१ ॥ न पश्यति हि जात्यंधः । कामांधो नैव पश्यति ॥ न पश्यति मदोन्मत्तो । अर्थी दोषं न पश्यति ॥ ४२ ॥ किमु कुवलयनेत्राः सन्ति नो नाकिनार्य–स्त्रिदशपतिरहल्यां तापसीं यत्सिषेवे ॥ मनसि तृणकुटीरे दीप्यमाने स्मराग्नौ ॥ उचितमनुचितं वा वेत्ति कः पंडितोऽपि ॥ ४३ ॥ विकलयति कलाकुशलं तत्त्वविदं पंडितं विडंबयति ॥ अधरयति धीरपुरुषं । क्षणेन मकरध्वजो देवः ॥ ४४ ॥

अथ स्वशीलरक्षार्थं तयोक्तं संप्रति मम दुःखं वर्त्तते, अतो नगरगमनानंतरं चिंतयिष्यते. इति तद्वचसा सागरदत्तः स्वस्थो जातः, इतस्तस्य प्रवहणमपि सुवायुना पूरितं गंभीरपुरनगरे प्राप्तम्, तावत्सौभाग्यसुंदरी स्वशीलरक्षार्थं प्रवहणादुत्तीर्य निकटस्थश्रीमदृषभदेवप्रासादमध्ये गत्वा कपाटौ दत्वा च स्थिता. उक्तं च तया यदि मम शीलप्रभावः स्यात्तर्हि ममोद्घाटनं विना कपाटौ मोद्घटतां, अथ स सागरदत्तः स्वगृहे गतः।धर्मबुद्धिमंत्री तु नमस्कारप्रभावात्फलकं लब्ध्वा क्रमेण समुद्रतटं प्राप्तः, यतः––जिणसासणस्स सारो । चउदसपुव्वाण जो समुद्धारो ॥ जस्स मणे नमुक्कारो । संसारो तस्स किं कुणइ ॥ ४५ ॥ एसो मंगलनिलओ भवविलओ सव्वसंतिजणओ य ॥ नवकारपरममंतो । चिंतिअमित्तो सुहं देइ ॥ ४६ ॥ अपुव्वो कप्पतरू एसो चिंतामणि अपुव्वो अ ॥ जो झायइ सया कालं । सो पावइ सिवसुहं विउलं ॥ ४७ ॥ नवकारिक्कअक्खरो । पावं फेडेइ सत्तअयराणं ॥ पन्नासं च पएणं । समग्गेणं तु मुक्खफलं ॥ ४९ ॥ जो गुणइ लक्खमेगं । पूएइ विहिए य जिणनमुक्कारं ॥ तित्थयरनामगोयं । सो बंधइ नत्थि

संदेहो ॥ ५० ॥ अट्ठेव य अट्ठसया । अट्ठसहस्सं च अट्ठकोडीओ ॥ जो गुणइ भत्तिजुतो । सो पावइ सासयं ठाणं ॥ ५१ ॥ अथ स समुद्रतटादग्रे भ्रमन् सन्नेकं शून्यं नगरं ददर्श. शनैःशनैर्नगरमध्ये प्रविशन् सोऽनेकमणिमाणिक्यरत्नविद्रुममौक्तिकस्वर्णादिविविधवस्तुक्रयाणकापूर्णापणश्रेणीः सतोरणा मंदिरश्रेणीश्च ददर्श, बाढं चमत्कृतश्च. साहसैनैकाक्येव नगरमध्ये व्रजन् स राजमंदिरे सप्तमभूमिकोपरि गतः, तत्र खट्वोपर्येकामुष्ट्रिकां स ददर्श. तथैव तत्र स कृष्णश्वेतांजनभृतकूपिकाद्वयं शलाकाद्वयं च ददर्श. तद् दृष्ट्वा विस्मितः सन् स कौतुकेन श्वेतांजनेनोष्ट्रिकाया नयने अंजनं चकार. तत्प्रभावाच्च सा दिव्यरूपा जज्ञे, तत्क्षणमेव च तयाऽसनं मुक्तं, ततो मंत्रिणा तस्यै पृष्टं, का त्वं? कस्य च सुता? कथमेवंविधा ? किमिदं नगरं ? कुतः कारणाच्च जनरहितं शून्यं ? इति श्रुत्वा सा कन्या निजनेत्राभ्यामश्रुपातं कुर्वंती प्राह—भो नरपुंगव त्वमितः शीघ्रं याहि ? अत्रैका राक्षसी विद्यते, सा त्वां भक्षयिष्यति. तदा मंत्रिणा पुनरपि पृष्टं, हे सुलोचने का सा राक्षसी ? इत्यादि सर्वं वृत्तांतं त्वं स्पष्टतरं कथय ? साह हे सत्पुरुष अस्य नगरस्य स्वामी भीमसेनो राजा, अहं च तस्य पुत्री, स मे पिता तु तापसभक्त आसीत्. एकदा कश्चित्तपस्वी मासोपवासी अस्मिन्नगरे समागतः, स च मत्पित्रा भोजनाय निमंत्रितः, अहं च राज्ञा तस्य परिवेषणायादिष्टा. ततोऽसौ तापसो मद्रूपं दृष्ट्वा चुक्षोभ. रात्रौ च मम समीपे समागच्छन् स प्राहरिकैर्धृत्वा बद्धः. प्रातश्च नृपस्य समर्पितः, राज्ञा च स शूलायामारोपितः, स आर्त्तध्यानेन मृत्वा राक्षसी बभूव, तया च नगरमुद्ध्वस्तं विधाय पूर्ववैरेण राजा व्यापादितः, तद् दृष्ट्वा नगर-

लोकाः सर्वेऽपि भयभ्रांतास्ततः पालयनं चक्रुः, नगरं च शून्यं जातं. अहं तया मोहभावतो रक्षिता. पूर्वभवस्नेहेन महामोहेन च श्वेतांजनेनोष्ट्रीरूपेण स्थापिता. प्रतिदिनं च सा राक्षसी मम सारकरणार्थमत्र समागच्छति. अतस्त्वं प्रच्छन्नो भव ? यतः सा राक्षसी संप्रत्येव समागमिष्यति. पुनरेकदा सा राक्षसी मया पृष्टा, हे मातरहमत्रारण्ये एकाकिनी किं करोमि ? अतस्त्वं मां मारय ? तयोक्तं यदि योग्यं वरमहं लप्स्ये, तदा तस्मै त्वामहं दास्यामि.

अथ सांप्रतं तस्यागमनवेलास्ति, सा च कदाचिन्मां तुभ्यं दत्ते, तदा त्वयाऽस्या राक्षस्याः पार्श्वादाकाशगामिनी विद्या. सप्रभावा खट्वा, महार्घ्यरत्नपेटिका, सप्रभावे रक्तश्वेतकणवीरकंबे, दिव्यरत्नग्रंथ्यौ च, एतानि वस्तूनि मार्गणीयानि करमोचनावसरे, इतिसंकेतं गृहीत्वा मंत्री प्रच्छन्नः स्थितः, इतश्च मनुष्यं भक्षयामीति वदंती राक्षसी समागता. तया च श्वेतांजनेन सोष्ट्रिका कन्या चक्रे. ततस्तया राक्षस्या सह वार्त्तां कुर्वत्या स्वयोग्यो वरो याचितः, तदा राक्षस्योक्तं कमपि तव योग्यं वरं न पश्यामि, कन्ययोक्तमहमेव ते योग्यं वरं दर्शयामि. राक्षस्योक्तं तर्ह्यधुनैव त्वां तस्मै ददामि. ततः पूर्वसंकेततस्तत्र मंत्री प्रकटीबभूव, राक्षस्यापि स तया सह परिणायितः, करमोचनावसरे च खट्वादिपंचकं तेन याचितम्, तयापि च तत्सर्वं तस्मै समर्पितम्. ततो राक्षसी क्रीडाद्यर्थमन्यत्र जगाम. तदा तया कन्यया मंत्र्यूचे, हेस्वामिन् सांप्रतमावां स्वस्थानं गच्छावः, मन्त्रिणोक्तं कथं गम्यते? स्वपुरादिमार्गाऽपरिज्ञानात्. ततः कन्ययोक्तं सांप्रतमावाभ्यां रत्नग्रंथिद्वयं गृहीत्वा खट्वायां चोपविश्य श्वेतकंबया सा हन्याः, ततः सा चिंतिते पुरेनेष्यति; यदि च

Scanned by CamScanner

कदाचिद्राक्षसी पृष्टे समागच्छेत्तदा त्वया सा रक्तकणवीरकंबया हंतव्या, ततः सा निःप्रभावा पश्चाद्यास्यति.

अथैवं तयोश्चलनानंतरं सा राक्षसी तत्र समागता. स्वस्थानं च शून्यं दृष्ट्वा हा मुषितास्मीति चिंतयंती सा तयोः पृष्टे धाविता, मिलिता च. मन्त्रिणा कणवीरकंबया हता सती पश्चाज्जगाम. ततो यत्र प्राक्तने द्वे भार्ये, यत्र च गंभीरपुरं पत्तनम्, तस्मिन्नेव पुरे उद्यानवनमध्ये खट्वाप्रभावान्मंत्री समागात्, कन्यादिकं बहिर्मुक्त्वा मन्त्री स्थानविलोकनाय नगरांतर्गतः, इतस्तत्रैका वेश्या समागता. तया तत्कन्यारूपं दृष्ट्वा चिंतितं, यद्येषाऽस्मद्गृहे समागच्छेत्तदांगणे कल्पवल्ल्येव रोपिता भवेत्, अतः केनाप्युपायेनैषा ग्राह्या. इति विमृश्य तत्पार्श्वे समागत्य सा वदति, वत्स त्वं कस्य पत्नी ? कुतश्चागता ? क्व च तव भर्त्तेति पृष्टा सती सा तदग्रे यथास्थितं निजस्वरूपं जगाद्. तदा कपटपाटवोपेतया वेश्यया कथितं तर्हि तु त्वं मम भ्रातृजायासि, कथमत्र स्थिता ? मंत्री तु मद्गृहे प्राप्तः, तेन चाहं तवाकारणार्थं प्रेषितास्मि, ततस्त्वमेहि मया सार्द्धं मे मन्दिरे, ततः सा सरलस्वभावतया तद्गृहे गता.—नात्यन्तसरलैर्भाव्यं गत्वा पश्य वनस्पतिं ॥ सरलास्तत्र छिद्यंन्ते । कुब्जास्तिष्ठन्ति पादपाः ॥ ५२ ॥ तया च सा निजावासे सप्तमभूमौ स्थापिता.

अथ सा वेश्यां प्रति पृच्छति क्व मे भर्त्ता ? सा प्राह अत्र तव बहवो भर्त्तारः समायास्यंति इत्युक्त्वा तया स्वकुलाचारः प्रोक्तः. तदा तया कन्यया चिंतितं, हा अथ मया कथं स्वशीलं रक्षणीयं ? यतः—शीलं नाम नृणां कुलोन्नतिकरं शीलं परं भूषणं । शीलं ह्यप्रतिपाति वित्तमनघं शीलं सुगत्यावहं ॥ शीलं दुर्गतिनाशनं सुविपुलं शीलं यशःपाव-

नं । शीलं निर्वृतिहेत्वनंतसुखदं शीलं तु कल्पद्रुमः ॥५३॥ अथ तया स्वशीलभंगभयादपवरके प्रविश्य कपटानि दत्तानि. तच्छीलप्रभावाच्च तानि कथमपि न समुद्घटंति, अथ सा प्राक्परिणीता मन्त्रिपत्नी विनयसुन्दर्यपि श्रीदत्तकुंभकारगृहस्थिता केनापि कामिना राजपुत्रेण हास्यादिना पराभूता स्वशीलरक्षार्थं तथैव स्थितास्ति. इतोऽयं व्यतिकरो राजलोकैर्ज्ञातः, ततः स्वनगरानर्थभीतेन राज्ञा पटहोद्घोषणा कारिता. यत् यः कश्चिदेतत्कपाटत्रयमुद्घाटयिष्यति, कन्यात्रयं च वादयिष्यति तस्य राजा स्वराज्यार्द्धं राजकन्यां च दास्यति.

इतः स मन्त्री निजनिवासार्थं स्थानं विलोक्य भोजनं च गृहीत्वा यावत्तत्रोपवने समागतस्तावत्तेन तत्र निजभार्या न दृष्टा. तदा विह्वलः सन् स नगरमध्ये भ्रमितुं लग्नः, इतस्तेन सा पटहोद्घोषणा श्रुता, व्यतिकरं च विज्ञाय पटहं स्पृष्ट्वा बहुजनपरिवृतो मन्त्री कुम्भकारगृहे समागतः, तत्र च द्वारपार्श्वे समागत्य तेन पृथ्वीभूषणनगरनिर्गमनादारभ्य गंभीरपुरप्राप्तिविनयसुन्दरीदेवकुलमोचनावधि सर्वोऽपि वृत्तांतो गदितः, तत् श्रुत्वा तूर्णं विनयसुन्दर्या कपाटावुद्घाटितौ, उपलक्षितश्च मन्त्री, ततः श्रीयुगादिदेवप्रासादे समागत्य प्रवहणचलनादारभ्य समुद्रांतःपतनं यावत्तेन संबन्धः प्रोक्तः तदा रत्नवत्यापि स्वरेण स्वपतिमुपलक्ष्य कपाटावुद्घाटितौ. ततोऽसौ मन्त्री वेश्याया गृहे समागत्य फलकप्राप्तितः समुद्रतरणादारभ्य तन्नगरप्राप्तिस्थानविलोकनभोजनग्रहणनिमित्तं नगरमध्यागमनं यावद्वृत्तांतमुक्तवान्. तदा तया तृतीययापि तथैव मन्त्रिणमुपलक्ष्य कपाटावुद्घाटितौ. एवं तास्त्रयोऽपि भार्याः स्वपतिमासाद्य स्वस्ववृत्तांतं मन्त्रिणे कथया-

Scanned by CamScanner

मासुः, प्रमुदितेन राज्ञापि निजराज्यार्द्धं स्वकन्यां च मन्त्रिणे दत्ता. अथ मन्त्रिणा राज्ञे सागरदत्तस्य वेश्यायाश्च वृत्तांतो
निवेदितः, तदा राज्ञा सागरदत्तमाकार्य मन्त्रिसत्कं सर्वं द्रव्यादिकं मन्त्रिणे दापितं, अन्यायकारिणस्तस्य च चौरदन्डो
दत्तः, तदा दयालुना मन्त्रिणा नृपतिपादयोर्लगित्वा स जीवन्मोचितः, अथ राज्ञा वेश्याया अपि सर्वं धनादि गृहीत्वा,
तत्कर्णनासिकाछेदं च कारयित्वा स्वदेशात्सा बहिर्निष्कासिता, अथ मन्त्री ताभिश्चतसृभिर्जायाभिः सह दोगुन्दकदेववद्वि-
षयसुखान्युपभुंजानस्तत्र कियद्दिनानि सुखेनास्थात्, अथैकदा पाश्चात्यरात्रौ स धर्मबुद्धिर्मंत्री जागरितः सन् पापबुद्धि-
नृपकृतापमानादि स्मृत्वा, तस्य पुण्यफलदर्शनार्थं प्रभाते निजस्त्रीभिर्युतो महता सैन्येन पृथ्वीभूषणनगरं प्रति चचाल
परचक्रमागतं श्रुत्वा पापबुद्धिनृपो गोपुरद्वाराणि दृढं पिधाय नगरमध्ये एव स्थितः, तदा मन्त्रिणा नृपं प्रति दूतः प्रेषितः,
दूतेन चागत्य पापबुद्धिनृपायोक्तं, हे राजन् मम स्वामी वदति यन्मया सार्द्धं युद्धं कुरु ? नोचेन्मुखे तृणं गृहीत्वा नगरा-
न्निर्गत्यात्रागच्छ ? तत् श्रुत्वा राज्ञोक्तं प्रभाते युद्धं करिष्ये. प्रातः स पापबुद्धिनृपः सर्वबलेन युतो युद्धाय बहिर्निर्गतः,
द्वयोः सैन्ययोर्युद्धे जायमाने सति धर्मबुद्धिमन्त्री पापबुद्धिनृपं बध्ध्वा प्रोक्तवान, हे नृप किं त्वं मामुपल-
क्षयसि ! राज्ञोक्तं ; देव त्वामादित्यमिव को न वेत्ति ? मन्त्रिणोक्तमेवं न; विशेषलक्षणेनोप लक्षयस्व ? राज्ञो-
क्तं नोपलक्षयामि मन्त्रिणोक्तं सोऽहं धर्मबुद्धिस्तव धर्मफलदर्शनायागतोऽस्मि. अथ त्वं वद ? किं धर्मोऽस्ति वा न? इ-
त्युक्त्वा मन्त्रिणा स राजा धर्मफलविषये दृढीकृतो मुक्तश्च. ततस्तयोः प्रमोदः समुत्पन्नः. पापबुद्धिनृपस्यापि पुण्यफलं

दृष्ट्वा धर्मोपरि भावो जातः, ततो तौ द्वावपि तत्रैव नगरे सुखेन राज्यं चक्रतुः ।

कियता कालेन केवलज्ञानिमुनिं वनपालमुखादुपवने समवसृतं श्रुत्वा नृपसचिवादयस्तं वंदनार्थं समागताः, तत्र केवलिनाऽपीत्थं धर्मदेशना प्रारब्धा-"भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं । माने म्लानिभयं जये रिपुभयं वंशे कुयोषिद्भयं ॥ दास्ये स्वामिभयं गुणे खलभयं काये कृतांताद्भयं।सर्वं नाम भयं भवेदिह नृणां वैराग्यमेवाऽभयं॥५४॥यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा । यावच्चेंद्रियशक्तिरऽप्रतिहता यावत्क्षयो नायुषः ॥ आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महा—नादीप्ते भुवने च कूपखननं प्रत्युद्यमः कीदृशः ॥ ५५ ॥

दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवेद्गर्भवासे नराणां । बालत्वे चापि दुःखं मललुलितवपुःस्त्रीपयःपानमिश्रं ॥ तारुण्ये चापि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः । संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित् ॥ ५६ ॥ निर्द्रव्यो धनचिंतया धनपतिस्तद्रक्षणे चाकुलो । निःस्त्रीकस्तदुपायसंगतमतिः श्रीमानपत्येच्छया॥प्राप्तस्तान्यखिलान्यपीह सततं रोगैः पराभूयते । जीवः कोऽपि कथंचनापि नियतं प्रायः सदा दुःखितः ॥ ५७ ॥ विलंबो नैव कर्त्तव्य आयुर्याति दिने दिने ॥ न करोति यमः क्षांति—र्धर्मस्य त्वरिता गतिः ॥ ॥५७॥" इति देशनाश्रवणानन्तरं राज्ञा पृष्टं, हे भगवन् मया पूर्वभवे किं कर्म कृतं ? येन मम धर्मोऽत्र नाऽभीष्टो जातः. सचिवेन च कीदृशं कर्म कृतं ? येनेदृशी महती ऋद्धिस्तेन प्राप्ता ? ततः केवली प्राह—पूर्वभवे युवां सुन्दरपुरन्दरनामानौ भ्रातरावभवेतां. सुन्दरस्तु मिथ्यात्वमोहितत्वा-

Scanned by CamScanner

दज्ञानकष्टकर्त्ता तापसो जातः, पुरन्दरस्तु जैनसाधुसंगत्या तदुपदेशानुसारेण जिनप्रासादं कारयितुं प्रारम्भं कृतवान्,
अर्द्धनिष्पन्ने च जिनप्रासादे तेनैवंविधः संशयः कृतो, यन्मया बहुसहस्रद्रव्यव्ययं कृत्वा प्रासादः कारयितुं प्रारब्धोऽस्ति. परमेतन्निर्मापणेन मम किमपि फलं भविष्यति न वा ? इति संशयकरणानन्तरं पुनस्तेन चिंतितं, हा मया व्यलिकं ध्यातं, मम प्रासादनिर्मापणफलं भविष्यत्येव, इति विचिंत्य तेन संपूर्णभावेन स जिनप्रासादः सम्पूर्णीकृतः, आयुषः क्षये च युवां द्वावपि मृतौ. सुन्दरजीवस्तु बह्वज्ञानकष्टाद्धिंसादिविधानेन त्वं पापबुद्धिर्नृपो जातः, पुरंदरजीवस्तु श्री जैनधर्मप्रसादाद्धिंबप्रतिष्ठातीर्थयात्रागुरुभक्तिसाधर्मिकवात्सल्यपौषधशालाऽनेकदीनदानादि पुण्यं कृत्वा त्वं समृद्धिवान् धर्मबुद्धिनामा मन्त्री जातः, तत् श्रुत्वा तौ द्वावपि दीक्षां गृहीत्वा तपस्तप्त्वा चारित्राधाराध्य केवलज्ञानमासाद्य मोक्षं जग्मतुः, ॥ इति श्री धर्मपरीक्षायां पापबुद्धिराजा धर्मबुद्धिश्च मन्त्री, तत्सम्बन्धिनी—

॥ कामकुंभकथा सम्पूर्णा ॥



Scanned by CamScanner